|| श्री गणेशाय नमः ||

# *पार्थिव गणेश चतुर्थी पूजा विधी*



https://www.shreegajananjyotish.com

# कलश पूजन

कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शांतिःपुष्टिकरी तथा ॥ आयांतु देवपूजार्थं दुरितक्षयकारकाः ॥ गंगे च यमुने चैव गौदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेस्मिन् सन्निधिं कुरु ॥ कलशाय नमः ॥ सर्वोपचारार्थे गंधाक्षतपुष्पं समर्पयामि ॥

( आपल्या डाव्या बाजूला पूजेकरिता घेतलेल्या तांब्याला गंध , अक्षता व फूल लावावे)

# शंख पूजन

पांचजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः शंखः प्रचोदयात् ॥ शंखाय नमः ॥ सर्वोपचारार्थे गंधपुष्पं समर्पयामि ॥

(आपल्या उजव्या बाजूस ठेवलेल्या शंखाला स्नान घालून त्यात पाणी भरुन गंध , फूल वाहावे )

# घंटा पूजन

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ कुर्वे घंटारवं तत्र देवताह्वानलक्षणम् ॥ घंटायै नमः ॥ सर्वोपचारार्थे गंधाक्षतपुष्पं समर्पयामि ॥ घंटानादं कुर्यात् ॥

( या मंत्राने घंटेला स्नान घालून गंधाक्षता , फूल लावून घंटा वाजवून डाव्या बाजूला ठेवावी)

# दीप पूजन आणि प्रौषण

दीपदेवताभ्यो नमः ॥ सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा । यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ पूजाद्रव्याणि संप्रोक्ष्य आत्मानं च प्रोक्षेत् ॥

( या मंत्राने कलशातील पाणी तुळशीपत्राने घेऊन पूजेच्या साहित्यावर शिंपडून नंतर आपल्या अंगावर शिंपडावे नंतर प्राणप् .रतिष्ठा करावी . )

# प्राण प्रतिष्ठा मंत्र

ॐ अस्यै प्राणा: प्रतिष्ठंतु अस्यै प्राणा: क्षरंतु च । अस्यै देवत्व मर्चायै मामहेति च कश्चन ॥

इति मंत्रेण देवस्य आज्येन नेत्रोन्मीलनं कृत्वा ।

(पुढील मंत्र म्हणताना देवाच्या ह्रदयाला उजवा हात लावून ठेवावा व वरील मंत्राने देवाच्या डोळयांना तूप लावावे)

श्रीसिद्धिविनायकाय नमः ॥ गंधाक्षतपुष्पं हरिद्रां कुंकुमं च समर्पयामि ॥

( या मंत्राने देवाला गंध , अक्षता , हळद , कुंकू व फुले वाहावी )

श्रीसिद्धिविनायकाय नमः ॥ धूपं दीपं नैवेद्यं च समर्पयामि ॥

( या मंत्राने देवाला उदबत्ती व नीरांजन ओवाळून गूळखोबऱ्याचा नैवेद्य दाखवावा ( .

श्रीसिद्धिविनायकाय नमः । मुखवासार्थे पूगीफलतांबूलं सुवर्णपुष्पदक्षिणां मंत्रपुष्पं च समर्पयामि ॥

( देवाला विडा दक्षिणा ठेवून त्यावर पाणी सोड -ून नंतर देवाला फूल वाहून नमस्कार करावा )

## आवाहन मंत्र

**आगच्छ देवदेवेश तेजोराशे जगत्पते ।**
**क्रियामाणां मया पूजां गृहाण गणनायक ॥**
**श्री सिद्धिविनायकाय नमः ।**
**आवाहनार्थे दूर्वांकुरान् पुष्पांजलि समर्पयामि**

(आवाहनार्थ दूर्वांकुर, फुले वाहावीत.नमस्कार करावा .)

## आसन मंत्र

**नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।**

**आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् ॥**

**श्री सिद्धिविनायकाय नमः ।**

**आसनार्थे दूर्वांकुरान् अक्षतान् समर्पयामि ॥**

( दूर्वांकुर, अक्षता गणपतीच्या चरणावर वाहाव्यात. )

## पाद्य मंत्र

**सर्वतीर्थसमानीतं पाद्य गन्धादिसंयुतम् ।**

**विघ्नराज गृहाणेदं भगवन् भक्तवत्सल ॥**

**श्री सिद्धिविनायकाय नमः ।**

**पाद्यो पाद्यं समर्पयामि ।**

( गणपतीच्या चरणावर दूर्वांकुराने पाणी शिंपडावे. )

## अर्घ्य मंत्र

**गणाध्यक्ष नमस्तेऽस्तु गृहण करुणानिधे ॥**

**श्री सिद्धिविनायकाय नमः ।**

**हस्तयोः अर्घ्येः समर्पयामि ॥**

( गणपतीवर गंधाक्षतापुष्प वाहावेपळीत पाणी घेऊन त्यात गंध ., अक्षता, फूल, दूर्वांकुर व सुपारी घालून गणपतीच्या हातावर अर्घ्य सोडावे)

## आचमन मंत्र

**विनायक नमस्तुभ्यं त्रिदशैरभिवंदित ।**
**शुद्धोदकेन तोयेन शीघ्रमाचमनं कुरु ॥**
**श्री सिद्धिविनायकाय नमः ।**
**आचमनीयं समर्पयामि ॥**

( पळीभर पाणी ताम्हनात सोडावे )

## स्नानं मंत्र

**गंगादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् ।**
**भक्त्या समर्पितं तुभ्यं स्नानायाभीष्टदायक ॥**
**श्री सिद्धिविनायकाय नमः । स्नानं समर्पयामि ॥**

( फुलाने गणपतीवर किंचित शुद्धोदक शिंपडावे. )

## पंचामृत स्नान मंत्र

**पयो दधि घृतं चैव मधुशर्करया युतम् ।**
**पंचामृतेन स्नपनं क्रियतां परमेश्वर ॥**
**श्री सिद्धिविनायकाय नमः ।**
**पंचामृतस्नानं समर्पयामि ॥**
**पंचामृत स्नानांतरेण शुद्धोदकस्नानं समर्पयामि ।**
**सकलपूजार्थे अक्षतान् समर्पयामि ।**

( दूध, दही, तूप, मध व साखर वाहणे)

# पूर्वपूजा

( गणपतीला नाममंत्रानी पंचोपचार करावे)

**श्री सिद्धिविनायकाय नमः । विलेपनार्थे चंदन समर्पयामि ।** ( गंध लावावे(.

**श्री सिद्धिविनायकाय नमः । पूजार्थे पुष्पाणि समर्पयामि ।** ( फुले वाहावी)

**श्री सिद्धिविनायकाय नमः । धूपं समर्पयामि ।** ( धूप दाखवावा)

**श्री सिद्धिविनायकाय नमः । दीपं समर्पयामि ।**

( नीरांजन ओवाळावे)

**श्री सिद्धिविनायकाय नमः । नैवेद्यार्थे पंचामृतशेषनैवेद्यं समर्पयामि ।**

( पंचामृताचा नैवेद्य दाखवावा.)

**ॐ प्राणाय स्वाहा। ॐ अपानाम स्वाहा।**
**ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा।**
**ॐ समानाय स्वाहा। ॐ ब्रह्मणे स्वाहा। नंतर श्री सिद्धिविनायकाय नमः। उत्तरापोशनं समर्पयामि।**
**हस्तप्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि।**

पाणी सोडावे आणि दोन विड्याची पाने त्यावर सुपारी व दक्षिणा यांसह गणपतीसमोर ठेवून त्यावर पाणी सोडून म्हणावे

श्री सिद्धिविनायकाय नमः।

**मुखवासार्थे पूगीफलतांबूलं दक्षिणां च समर्पयामि।**

आणि मग उजव्या हाताने ताम्हनात पळीने पाणी सोडून गणपतीला नमस्कार करावा)

**अनेन पूर्वाराधनेन श्री सिद्धिविनायका: प्रीयताम् ।**
**उत्तरे निर्माल्यं विसृज्य । अथ अभेषेकं कुयात् ।**

(गणपतीवर वाहिलेली फुले काढून उत्तरेकडे ठेवावी आणि अभिषेक करावा.)

**टीप :- अभिषेकासाठी गणपती अथर्वशीर्ष एकदा म्हणावे. अभिषेक करताना दूर्वेने पाणी शिंपडावे**

## वस्त्र पूजा मंत्र

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
पयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
श्री सिद्धिविनायकाय नमः । वस्त्रोपवस्त्रे
समर्पयामि ।

(गणपतीला कापसाची वस्त्रे वाहावीत)

## उपवस्त्र पूजा मंत्र

**जानवे ( यज्ञोपवीत )**

**देवदेव नमस्तेऽस्तु त्राहि मां भवसागरात् ।**
**ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥**
**श्री सिद्धिविनायकाय नमः ।**
**उपवस्त्रार्थे यज्ञोपवीतं समर्पयामि ।**

( गणपतीला जानवे घालावे)

## गंध मंत्र

श्रीखंड चंदनं दिव्यं गंधाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।
श्री सिद्धिविनायकाय नमः । चन्दनं
समर्पयामि ।

( गणपतीला तांबडे गंध लावावे)

## अक्षता

रक्ताक्षतांश्च देवेश गृहाण द्विरदानन ।
ललाटपटले चन्द्रस्तस्योपरि विधार्यताम् ॥
श्री सिद्धिविनायकाय नमः ।
अक्षतान् समर्पयामि ।

( गणपतीला कुंकुमाक्षता वाहाव्यात)

## सिंदूर

उदितारुणसंकाशं जपाकुसुमसंनिभम् ।
सीमंतभूषणार्थाय सिंदूरं प्रतिगृह्यताम् ॥
श्री सिद्धिविनायकाय नमः । सिंदूरं समर्पयामि ।

( गणपतीला शेंदूर लावावा)

## अलंकार

**अनेकरत्नयुक्तानि भूषणानि बहूनि च ।**
**तत्तदंगे योजयामि कांचनानि तवाज्ञया ॥**
**श्री सिद्धिविनायकाय नमः । नानाभूषणानि समर्पयामि ।**

(ऋद्धिसिद्धींना हळद, कुंकू, काजळ, सिंदूर, मंगलसूत्र, कंकणे क्रमाने वाहावीत.)

## हळद

**हरिद्रा स्वर्णवर्णाभा सर्वसौभाग्यदायिनी ।**
**सर्वालंकारमुख्या हि देवि त्वं प्रतिगृह्यताम् ॥**
**श्री ऋद्धिसिद्धिभ्यां नमः । हरिद्रां समर्पयामि ।**

## कुंकू

**हरिद्राचूर्णसंयुक्तं कुंकुमं कामदायकम् ।**
**वस्त्रालंकरणं सर्व देवि त्वं प्रतिगृह्यताम् ॥**
**श्री ऋद्धिसिद्धिभ्यां नमः । कुंकुमं समर्पयामि ।**

## काजळ

कज्जलं कामिकं रम्य कामिनीकामसंभवम् ।
नेत्रयोर्भूषणार्थाय कज्जलं प्रतिगृह्यताम् ॥
श्री ऋद्धिसिद्धिभ्यां नमः । कज्जलं समर्पयामि

## पुष्पे

माल्यादीनि सुंगधीनि मालत्यादीनि वै प्रभो ।
मया हृतानि पूजार्थे पुष्पाणि प्रतिगृह्यताम् ॥
श्री सिद्धिविनायकाय नमः । नानापुष्पाणि
समर्पयामि ।

( गणपतीला तांबडी फुले वाहावीत )

## दूर्वा

कांडात्काण्डात्प्ररोहन्ति परुषः परुषः परि ।
एवानो दूर्वे प्रतनू सहस्रेण शतेन च ॥
श्री सिद्धिविनायकाय नमः । दूर्वांकुरान्
समर्पयामि ।

## धूप

**वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः।**
**आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥**
**श्री सिद्धिविनायकाय नमः। धुप समर्पयामि।**

( गणपतीला धूपारतीने किंवा उदबतीने ओवाळावे. )

## दीप

**आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।**
**दीपं गृहाण देवेश ममाज्ञानं निवारय॥**
**श्री सिद्धिविनायकाय नमः। दिपं समर्पयामि।**

( गणपतीला नीरांजनाने पायापासून मस्तकापर्यंत घंटा वाजवीत ओवाळावे. )

## नैवेद्य

**नैवेद्य गृह्यतां देव भक्ति मे ह्यचलां कुरु।**
**ईत्सितं मे वरं देहि परत्र च परां गतिम्॥**
**श्री सिद्धिविनायकाय नमः। नैवेद्यं समर्पयामि।**

( गणपतीला गूळ, खोबरे, मोदक इत्यादी जो पदार्थ नैवेद्य दाखववावा)

## तांबूल

**पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।**
**कर्पूरैलासमायुक्तं तांबुल प्रतिगृह्यताम् ॥**
**श्री सिद्धिविनायकाय नमः ।**
**पूगीफल - तांबूलं समर्पयामि ।**

( गणपतीपुढे विडा व सुपारी ठेवून उजव्या हातावरून एक पळी पाणी त्यावर सोडावे.)

## फळे

**फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।**
**तस्मात् फलप्रदानेन सफलाश्च मनोरथाः ॥**
**श्री सिद्धिविनायकाय नमः । विविध-फलानि समर्पयामि ।**

(गणपतीपुढे यथाप्राप्त फळे ठेवून एक पळी पाणी सोडावे.)



**PDF Created by -**

https://www.shreegajananjyotish.com/